# भाषावृत्त्यर्थविवृतिदिशा गुण-वृद्धिसंज्ञासूत्रविचारः

शङ्खशुभ्र-गच्छितः

उपक्रमः

बौद्धमतावलम्बिना बङ्गीयवैयाकरणेन पुरुषोत्तमदेवेन अष्टाध्याय्याः सूत्रार्थबोधनाय एका लघुवृत्तिः व्यरचि। वैदिकसूत्राणि परित्यज्य अस्यां लघुवृत्तौ केवलं लौकिकसूत्राणि एव ग्रन्थकृद्भिः पर्यालोचितानि सन्ति। अतः इयं लघुवृत्तिः भाषावृत्तिः इति नाम्ना शाब्दिकसमाजे प्रख्यातिम् अगात्।[1] इयं च भाषावृत्तिः अत्यन्तं सरला संक्षिप्ता च वर्तते। बङ्गप्रदेशे अस्याः भाषावृत्तेः महान् प्रभावः प्रचारश्च आसीत्। भाषावृत्तेः सारल्यं माहात्म्यं च वीक्ष्य पुरुषोत्तमदेवात् उत्तरवर्त्तिभिः बहुभिः शाब्दिकैः अस्याः व्याख्याप्रणयने यत्नो व्यधायि। एवमेव अस्याः भाषावृत्तेः व्याख्याचतुष्टयम् आसीत् इति प्राचीनग्रन्थालोडनेन विज्ञायते।[2] एतासु व्याख्यासु उत्कृष्टा विस्तृता च व्याख्या वर्तते सृष्टिधराचार्यैः विरचिता भाषावृत्त्यर्थविवृतिः इति। बहुषु प्राचीनग्रन्थेषु भाषावृत्तेः मुख्यव्याख्यात्वेन अस्याः भाषावृत्त्यर्थविवृतेः एव उल्लेखः सम्प्राप्यते। एवम्भूतायाः भाषावृत्त्यर्थविवृतेः स्वरूपम् अवश्यं सर्वैः शाब्दिकैः अधिगन्तव्यम् इति धिया अस्य शोधप्रबन्धस्य आदावेव भाषावृत्त्यर्थविवृतेः सामान्यपरिचयः प्रदीयते। ततश्च भाषावृत्त्यर्थविवृतौ प्रतिपादितस्य अदेङ्गुणः (पा.सू. १.१.२) इति गुणसंज्ञाविधायक-शास्त्रस्य, वृद्धिरादैच् (पा.सू. १.१.१) इति वृद्धिसंज्ञाविधायकसूत्रस्य च विस्तृतं व्याख्यानं प्रस्तूयते।

भाषावृत्त्यर्थविवृतेः परिचयः

अष्टाध्याय्याः लघुवृत्तिः वर्तते पुरुषोत्तमदेवविरचिता भाषावृत्तिरिति। तस्याः भाषावृत्तेः व्याख्या भवति सृष्टिधराचार्यैः विरचिता भाषावृत्त्यर्थविवृतिः इति। व्याख्यायां सः लिलेख-

नत्त्वा गुरून् विचार्य्य प्राचीनसंग्रहकृताञ्च मतानि।
श्रीसृष्टिधराचार्य्यो लघुवृत्तेः गौरवं कुरुते॥[3] इति।

अस्मिन् व्याख्याग्रन्थे काशिकाव्याख्यानस्य न्यासस्य महान् प्रभावः परिलक्ष्यते।

तस्मात् एव ग्रन्थारम्भे सृष्टिधराचार्यैः उच्यते-

न्यासग्रन्थार्थतात्पर्य्यपर्य्यालोचनशालिभिः।
शोध्योऽयं करुणावद्भिः कृतिभिर्म्मे परिश्रमः॥[4] इति।

अद्यत्वे सम्पूर्णा भाषावृत्त्यर्थविवृतिः नैव सम्प्राप्यते। १९१२ तमे शतके कलिकाता-एशियाटिक्-सोसाइटि इति संस्थातः पण्डितगिरिशचन्द्रवेदान्ततीर्थैः सम्पादिता भाषावृत्त्यर्थविवृतिसहिता भाषावृत्तिः इत्येको ग्रन्थः प्रकाशितः।[5] तत्रापि भाषावृत्त्यर्थविवृतेः प्रथमाध्यायस्य प्रथमपादस्य एव निरूपणं वर्तते। ततः ऊर्ध्वं न प्रकाशितम्। प्रकाशितग्रन्थेऽपि प्रथमाध्यायस्य प्रथमपादस्य प्रारम्भभागात् "न पदान्तद्विर्व्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्व्विधिषु" (पा.सू. १.१.५८) इति सूत्रं यावत् सम्पूर्णं व्याख्यानम् उपलभ्यते।[6] ततः परं द्विर्वचनेऽचि" (पा.सू. १.१.५९) इति सूत्रस्य किञ्चिदेव व्याख्यानं प्राप्यते।[7] सम्पूर्णं तु नास्ति। अस्य व्याख्याग्रन्थस्य प्रथमाध्यायस्य प्रथमपादं (द्विर्वचनेऽचि इति सूत्रं यावत्) विहाय इतरे पादाः अद्यावधि अप्रकाशिताः सन्तः मातृकागारेषु विद्यन्ते इति प्राप्ततथ्यपर्यालोचनेन वक्तुं शक्यते। अस्य व्याख्यात्मकग्रन्थस्य केवलम् अङ्कीयप्रतिकृतिः (Pdf) एव सम्प्रति अवाप्यते। तत्रापि प्रकाशितग्रन्थस्य अत्यन्तं प्राचीनत्वात् बहुत्र पाठास्पष्टता दृश्यते। अतः पाठनिर्णये महान् क्लेशः अनुभूयते। किञ्च इमं ग्रन्थं विहाय भाषावृत्त्यर्थविवृतेः अन्यः कश्चन ग्रन्थः अद्यत्वे नैव प्राप्यते। १९०६ तमे शतके बाबु-प्रसन्न-कुमार-भट्टाचार्यवर्यस्य पृष्ठपोषकत्वे पीताम्बर-तर्कालङ्कारमहोदयैः हरिशचन्द्र-गोस्वामिमहोदयैश्च प्रथमतया बङ्गप्रदेशस्य विविधप्रान्तेभ्यः मातृकाषट्कं संगृह्य भाषावृत्त्यर्थविवृतिसहिता भाषावृत्तिः इति ग्रन्थस्य सम्पादने प्रयासः अकारि। किन्तु बाबु-प्रसन्न-भट्टाचार्यमहोदये दिवंगते सति तस्मादित्त्युत्तरस्य (पा.सू. १.१.६७) इति सूत्रं यावत् एव व्याख्याग्रन्थस्य प्रकाशः जातः, अग्रे कार्यं न जातम्। ततः परं इमाः षट्-मातृकाः स्वीकृत्य अस्य व्याख्याग्रन्थस्य सम्पादने कलिकाता-एसियाटिक्-सोसाइटि-संस्थया अपि यत्नः कृतः। किन्तु प्रथमाध्यायस्य प्रथमपादस्य कञ्चन भागं सम्पाद्य केनचित् अज्ञातकारणेन अग्रे एतत्कार्यमपि न सम्पन्नम्।[8] १९१८ तमे शतके श्रीशचन्द्रचक्रवर्तिमहोदयैः सम्पादिते भाषावृत्तिग्रन्थस्य भूमिकाभागे भाषावृत्त्यर्थविवृतिग्रन्थस्य आद्यन्तभागस्य निदर्शनं प्राप्यते। तत्र भूमिकाभागे ११तमे

पत्रे आदिमभागः इत्थं सूचितः-

"ओँ नमो गणेशाय।
अथ भाषावृत्त्यर्थविवृति।
सुरमथनं पुरमथनं मारमणमुमारमणम्।
फणधरतल्पं फणाधरतल्पं वन्दे वाणारिमसमवाणारिम्॥
नत्त्वा गुरून् विचार्य्य प्राचीनसंग्रहकृताञ्च मतानि।
श्रीसृष्टिधराचार्य्यो लघुवृत्तेर्गौरवं कुरुते॥...

स्वाभीष्टदेवतानतिरूपं मङ्गलं शिष्यशिक्षार्थमुपनिबन्धन् प्रयोजनार्थिनः प्रेक्षावतः प्ररोचयन् ग्रन्थारम्भे वृत्तिकृत्पद्यमेकं समुदाजहार- नम इति।...।"[9] इति। अस्य ग्रन्थस्य भूमिकाभागे १९ तमे पत्रे भाषावृत्त्यर्थविवृतिग्रन्थस्य अन्तिमभागस्य निदर्शनं प्राप्यते- "अ अ इति (८। ४। ६८)। आद्यो विवृतो द्वितीयः संवृतः।...

भाषावृत्त्यर्थविवृतावष्टमाध्यायसङ्गतः।
चतुर्थो विवृतः पादः श्रीसृष्टिधरशर्मणा॥

इति श्रीसृष्टिधरचक्रवर्तिकृता भाषावृत्त्यर्थविवृतिः समाप्ता। श्रीरामः। श्रीः।" इति।[10]

एवं ग्रन्थस्यास्य आद्यन्तभागं दृष्ट्वा ज्ञायते यत् व्याख्येयं सम्पूर्णायाः भाषावृत्तेः उपरि एव विलिखिता आसीदिति। तत्र विश्वरूपनामकेन केनचित् विदुषा भाषावृत्तेः व्याख्यात्मकः विवरणपञ्जिका इति ग्रन्थः व्यलेखि। सृष्टिधरस्य भाषावृत्त्यर्थविवृतिग्रन्थे पञ्जिकायाः अष्टादशोल्लेखाः प्राप्यन्ते। अतः केचन वदन्ति विवरणपञ्जिकया सह अस्याः भाषावृत्त्यर्थविवृतेः साम्यं वर्तते इति। परन्तु दीनेशचन्द्रभट्टाचार्यस्य मते सा पञ्जिका विश्वरूपविरचिता न अपितु तद्भिन्नेन केनचित् अन्येन लिखिता इति। अनेन व्याख्याग्रन्थेन सह भाषावृत्त्यर्थविवृतेः साम्यं प्रायः नास्ति इति विश्वरूपविरचिता भाषावृत्तिविवरणपञ्जिका इति शोधप्रबन्धस्य (The Bhashavrittivivaranapanjika of Visvarupa, The First Adhyaya and a detailed examination) दर्शनेन ज्ञायते। एवम्भूतस्य विशिष्टस्य भाषावृत्त्यर्थविवृतिग्रन्थस्य अध्ययनेन ग्रन्थस्य गभीरं तत्त्वं यथा प्रकटितं भवति तथैव तस्मिन् समये बङ्गीयानां विदुषां कियत् पाण्डित्यम् आसीत् तदपि ज्ञातुं शक्यते। अस्य ग्रन्थस्य मातृकाः सम्पूर्णानन्दविश्वविद्यालयः, ढाकाविश्वविद्यालयः, राजशाही-

वरेन्द्र-रिसर्च-मिउसियम्, इण्डियान्-आफिस-लाइब्रेरी चेत्यादिषु स्थानेषु रक्षिताः सन्ति।[11]

भाषावृत्तेः कियत्यः व्याख्याः आसन् इति विषये निश्चयः नास्ति। प्राप्ततथ्यानुसारेण भाषावृत्तेः व्याख्याचतुष्टयम् आसीत् इति वक्तुं शक्यते। ताश्च व्याख्याः सन्ति- भाषावृत्त्यर्थविवृतिः, फक्किकावृत्तिः, भाषावृत्तिपञ्जिका, तत्त्वार्थसन्दीपनी चेति।[12] किन्तु सम्प्रति भाषावृत्त्यर्थविवृतिं विना अन्या कापि प्रकाशिता व्याख्या नैव दृग्गोचरीभवति। अतः भाषावृत्तेः गभीरज्ञानाय सर्वैः शाब्दिकैः भाषावृत्त्यर्थविवृतिः अवश्यम् अध्येतव्या। एवमेव भाषावृत्तेः अर्थप्रकाशने अष्टाध्याय्याश्च सूत्रार्थप्रतिपादने अयं ग्रन्थः वैयाकरणानां कृते अत्यन्तम् उपकारकः स्यात् इत्यत्र नास्ति सन्देहः। अस्मिन् ग्रन्थे अष्टाध्याय्याः सूत्रक्रमेण कानिचित् संज्ञासूत्राणि, कानिचन विधिसूत्राणि, कतिचन परिभाषासूत्राणि, कानिचित् निषेधसूत्राणि, कतिचन च अतिदेशसूत्राणि स्वशैल्या व्याख्यातानि सन्ति। विविधसूत्राणाम् अर्थाः सरलरीत्या विस्तरेण च सह सृष्टिधराचार्यैः अस्मिन् ग्रन्थे प्रतिपादिताः सन्ति इति ग्रन्थपरिशीलनेन विज्ञायते। एवम्भूतः विशिष्टः व्याकरणग्रन्थः शाब्दिकानां पुरतः उपस्थापनीयः इति धिया अयं यत्नः।

भाषावृत्त्यर्थविवृतिदिशा गुणसंज्ञासूत्रविचारः

अदेङ्गुणः इति सूत्रेण गुणसंज्ञा विधीयते। अदेकार ओकारश्च गुणसंज्ञकाः स्युः[13] इति भाषावृत्तौ पुरुषोत्तमदेवेन अदेङ्गुणः इति सूत्रस्य अर्थः प्रतिपादितः। तत्र सूत्रे उपात्तस्य अदेङ् इत्यत्र अत् इति तपरकरणस्य किं फलमिति विषये सृष्टिधराचार्यैः व्याख्यायां न्यरूपि- अतः तकारः आकारनिवृत्त्यर्थः।[14] इति। अर्थात्, अकारेण आकारस्य सवर्णत्वेन ग्रहणं यथा न स्यात् अतः सूत्रे तपरनिर्देशः कृतः। एवमेव सूत्रे अत् इति निर्देशेन तत्समकालिकस्य ह्रस्वस्य अकारस्यैव प्रकृतसूत्रेण गुणसंज्ञा विधीयते, न तु आकारस्य। अत् इत्यत्र तपरकरणाभावे तु सवर्णग्राहकसूत्रेण अकारस्य सवर्णत्वे आकारस्य ग्रहणसम्भवे आकारस्यापि गुणसंज्ञा सिद्ध्यति, किन्तु तन्न इष्टमित्यतः सूत्रे तपरकरणं कृतम्। वृद्धिरादैच् इति सूत्रेण विधीयमाना वृद्धिसंज्ञा गुणसंज्ञायाः बाधिका भविष्यति इति चेत् उच्यते- एकसंज्ञाधिकाराभावात् नात्र वृद्धिसंज्ञा गुणसंज्ञां बाधिष्यते। यत्र एकसंज्ञाधिकारः वर्तते तत्रैव एकसंज्ञा अपरां संज्ञां

बाधते। अत्र तु एकसंज्ञाधिकारः नास्ति इत्यतः न तत्प्रसङ्गः। यदि वृद्धिसंज्ञा गुणसंज्ञां बाधेत तर्हि तरति इति सूत्रनिर्देशः न घटेत। शपि अकारे परे तृधातोः सार्वधातुकार्धधातुकयोः इत्यनेन दीर्घऋकारस्य गुणे उरण् रपरः इति सूत्रात् रपरत्वे तरति इति रूपं भवति। यदि वृद्धिसंज्ञया गुणसंज्ञा बाध्यते तर्हि प्रकृते तरति इत्यत्र आकारनिर्देशेन भाव्यम्। किन्तु न तथा पाणिनिमहर्षेः निर्देशः वर्तते। अतः अत्र एकसंज्ञाधिकाराभावात् वृद्धिसंज्ञा न गुणसंज्ञायाः बाधिका। मूले अत् एङ् गुणः इति एकवचनविवरणेन अत् च एङ् च इति समाहारद्वन्द्वसमासः इति ज्ञायते। अत्र अदेङ् इति समुदायस्य गुणसंज्ञा नास्ति, नेतुः इत्यादिनिर्देशात्। नीधातोः तृच्प्रत्यये गुणे ईकारस्य एकारे कृते नेता इति सिध्यति। तस्य च षष्ठीविभक्तौ रूपं वर्तते नेतुः इति। यदि अदेङ् इति मिलितानाम् एव संज्ञा स्यात् तर्हि नी इत्यत्र ईकारस्य स्थाने अदेङ् इति आदेशः स्यात् एकारः न स्यात्। अतो नात्र मिलितानां संज्ञा इति मन्तव्यम्। पुनश्च ऋकारस्य गुणे कृते कः आदेशः भवति इति शङ्का। ऋकारेण सह न कस्यापि विद्यते आन्तरतम्यसाम्यम्। अतः प्रश्नो भवति ऋकारस्य गुणे कृते कः आदेशः इति। तथोच्यते- ऋकारस्य गुणे तु सर्वे गुणाः प्राप्ताः सन्ति। तेषु कतमः आदिश्यते इति संशयः। तत्रोच्यते- कार्यकालं संज्ञापरिभाषमिति न्यायात्, गुणविधानसमये संज्ञासूत्रस्य अस्य उरण् रपरः इति परिभाषायाश्च उपस्थाने ऋकारस्य गुणो भवन् अर् इति भवति।

भाषावृत्त्यर्थविवृतिदिशा वृद्धिसंज्ञासूत्रविचारः

वृद्धिरादैच् इति सूत्रेण वृद्धिसंज्ञा विधीयते। अस्मिन् सूत्रे कति पदानि सन्ति इति प्रश्ने सृष्टिधराचार्यैः उच्यते- वृद्धिः, आत्, ऐच् इति पदत्रयात्मकं सूत्रमिदमिति। तत्र भाषावृत्तौ पुरुषोत्तमदेवेन अस्य सूत्रस्य अर्थो व्याख्यायि- आत् ऐ औ वृद्धिसंज्ञकाः स्युः[15] इति। अत्र वृद्धिः इति संज्ञापदम्, आदैच् इति संज्ञिपदम्। अत्र कश्चित् संशेते वृद्धिरादैच् इति सूत्रेण वृद्धिसंज्ञा विधीयते, किन्तु वृद्धिरादैच् इति सूत्रप्रणयनात् प्राक् तु वृद्धेः संज्ञात्वं नास्ति, अतः तादृशसंज्ञाभावात् अर्थवत्त्वाभावे कथमत्र प्रातिपदिकत्वम्, कथं च सुविभक्तिरिति। तत्रोच्यते- वृद्धिरिति पदमत्र स्वरूपपरं न तु अर्थपरम्। अर्थात्, वृद्धिशब्दः अत्र आणुपूर्वीपरः। तेन च स्वरूपपरस्य वृद्धिशब्दस्य संज्ञारूपेण अर्थवत्त्वमादाय अत्र वृद्धेः प्रातिपदिकत्वं वक्तव्यम्, ततश्च सुविभक्तिरिति। एवमेव

वृद्धिरेचि इत्यादौ तु तथा न शङ्क्यम्, वृद्धिरादैच् इति सूत्रविहितां वृद्धिसंज्ञां समाश्रित्य तत्र अर्थवत्त्वसिद्धौ प्रातिपदिकत्वे वृद्धिपदोत्तरसुविभक्तौ न किमपि बाधकम्। अत्र पुनः संशयः उत्पद्यते आदैच् इति एकमेव पदम् उत पृथक् पदद्वयम्। तत्रोच्यते- आत् ऐच् इति भिन्नं पदद्वयं वर्तते।[16] तेन सूत्रे अस्मिन् त्रीणि पदानि भवन्ति- वृद्धिः, आत्, ऐच्चेति। अत्र आत् च ऐच् च इति इतरेतरद्वन्द्वसमासे कृते बहुत्वं द्वित्वं च स्यात्। समाहारद्वन्द्वस्वीकारे तु द्वन्द्वाच्चुदषहान्तात् समाहारे (पा.सू. ५.४.१०६) इत्यनेन सूत्रेण अत्र टच् इति समासान्तप्रत्ययः स्यात्। किन्तु अत्र तथा न दृश्यते इत्यतः समासाभावः एव अत्र न्याय्यः इति व्याख्याकृताम् आशयः। एवम् ऐच् इति प्रत्याहारस्थस्य चकारस्य पदान्तत्वे कुतो न चोः कुः (पा.सू. ८.२.३०) इत्यनेन कुत्वम्। उच्यते ऐच् इति अत्र ज्ञापकं भवति, प्रत्याहारे न कुत्वमित्यस्य। इयमेव सूत्रकृतः पाणिनिमहर्षेः शैली। तत्रोच्यते अयस्मयादीनि छन्दसि (पा.सू. १.४.२०) इत्यनेन अत्र भसंज्ञा भवति, भसंज्ञया अत्र पदसंज्ञा प्रबाध्यते, तेन पदसंज्ञाभावात् चोः कुः इति सूत्रस्य प्राप्तिरेव नास्ति। अतः न कुत्वम्। इदानीं पुनः प्रश्नो जायते यत् अयस्मयादीनि छन्दसि इति सूत्रेण विहिता भसंज्ञा तु छन्दस्येव प्रवर्तते, न चेदं छन्दः, कथं तर्हि अत्र भसंज्ञा? तत्रोच्यते- छन्दोवत् सूत्राणि भवन्ति इति वचनेन सूत्राणाम् अपि वेदतुल्यत्वात् अत्र भसंज्ञायां न बाधः। तत्र आदैच् इत्यत्र तकारे दकारे च उच्चारिते न कश्चन विशेषावगाहः। उच्चारणसुखमन्तरेण प्रयोजनान्तरं नास्ति इति ऋदोरप् (पा.सू. ३.३.५७) इति सूत्रवत् अत्र मुखसुखार्थः अयं यत्नः। तपरस्तत्कालस्य इति सूत्रे समस्तस्य तपरपदस्य द्विधा विग्रहः स्वीकृतः। तात्परः तपरः इति प्रथमो विग्रहः, तः परो यस्मात् सः तपरः इति द्वितीयो विग्रहः। तात्परः तपरः इति विग्रहवशात् ऐच् तपरः इति ज्ञायते। ऐचः तपराभावे ऐकारौकाराभ्यां स्वस्वसवर्णाः गृह्येरन्। सवर्णग्रहणे सति त्रिमात्राविशिष्टस्य ऐकारस्य औकारस्य, चतुर्मात्राविशिष्टस्य ऐकारस्य औकारस्य च वृद्धिसंज्ञा भविष्यति। तेन च वृक्ष एलका, वृक्ष ओदन इत्यादिषु उदाहरणेषु अकार-एकारयोः स्थाने, अकार-ओकारयोश्च स्थाने आन्तरतम्यात् त्रिमात्राविशिष्टः वृद्धिसंज्ञकः ऐकारः औकारश्च आदेशः स्यात्। एवमेव जाया ऐन्द्री गङ्गा औचित्यम् इत्यादिषु उदाहरणेषु चतुर्मात्राविशिष्टस्य आकार-ऐकारयोः स्थाने, आकार-औकारयोश्च स्थाने आन्तरतम्यात् चतुर्मात्राविशिष्टः ऐकारः

औकारश्च आदेशः स्यात्। तच्च दोषः। चतुर्मात्राविशिष्टस्य त्रिमात्राविशिष्टस्य च ऐचः वृद्धिसंज्ञा न भवतु इत्यतः एव नागेशादिभिः वैयाकरणैः तात्परः तपरः इति विगृह्य ऐचः तपरत्वं च स्वीकृत्य अस्य दोषस्य वारणं कृतम्। किन्तु भाषावृत्तिकर्त्ता पुरुषोत्तमदेवः तात् परः तपरः इति विग्रहं न स्वीकरोति। अतः तन्मते ऐच् इति न तपरः। तथात्वे ऐच् स्वसवर्णान् ग्रहीष्यति इति दोषाय। अस्य समाधानमुच्यते सृष्टिधराचार्यैः, ऐचां स्थाने त्रिमात्राविशिष्टः चतुर्मात्राविशिष्टश्च ऐजादेशः नैव प्राप्नोति, चतुर्मात्राविशिष्टस्य ऐचः उपलब्ध्यभावात्, प्लुतस्वरं विना त्रिमात्राविशिष्टस्यापि ऐचः अनुपलब्धत्वात् च। गायन-रोदनादिविषयेषु यद्यपि त्रिमात्रा-चतुर्मात्रादीनाम् उपलब्धिः भवति तथापि शास्त्रीयकार्येषु अनभिधानात्, लौकिकप्रयोगेषु च उपयोगाभावात्, लेखनाविषयत्वात् च लक्ष्येषु प्राप्तिरेव नास्ति। तस्मादेव तात्परः तपरः इति विग्रहम् अनङ्गीकृत्यापि वृक्षैलका, वृक्षौदनः, जायैन्द्री, गङ्गौचित्यम् इत्यादिषु उदाहरणेषु न कश्चन दोषः। अतः ऐच् न तपरः इति स्वीकृत्यापि कार्यनिर्वाहः शक्यः इति सृष्टिधराचार्यस्य विद्यते किञ्चित् विशिष्टं मतम्। सूत्रे प्रयुक्तः वृद्धिशब्दः अत्र स्त्रीलिङ्गपरः वर्तते। इको गुणवृद्धी (पा.सू. १.१.३) इत्यादिसूत्रेषु 'ये ते' इति विवरणात् वृद्धिशब्दः स्त्रीलिङ्गे वर्तते इति ज्ञायते। तद्यथा भाषावृत्तौ इको गुणवृद्धी इति सूत्रे उच्यते- अनुक्तस्थाने ये गुणवृद्धी ते इक एव स्थाने वेदितव्ये।[17] इति। तथा च स्त्रियां क्तिन् (पा.सू. ३.३.९४) इति क्तिन्प्रत्ययान्तः वृद्धिशब्दः संज्ञिनं प्रतिपाद्य प्रथमाभिधानात् मङ्गलार्थकत्वमपि भजते इति सिद्धान्तितम्।

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते आयुष्मत्पुरुषाणि वीरपुरुषाणि च भवन्ति इति वचनानुसारेण वृद्धिरादैच् इत्यत्र वृद्धिशब्दस्य प्रथममेव अभिधानात् वृद्धिशब्दः मङ्गलवाचकः इति परिज्ञायते। मध्ये च शिवशमरिष्टस्य करे (पा.सू. ४.४.१४३) इति सूत्रे शिवपदस्य उपादानात् तस्य च शमोऽल्पाच्तरत्वेन पूर्वनिपाते प्राप्ते शिवशब्दस्य प्रागुपादानात् मङ्गलार्थः गम्यते। शेषे च नोदात्तस्वरितोदयम् (पा.सू. ८.४.६७) इत्यादि वैदिकसूत्रे उदात्तस्वरितपरस्य इति वक्तव्ये उदयग्रहणं मङ्गलार्थम् इति ज्ञायते। एवमेव त्रिमङ्गलमिदं व्याकरणमित्युच्यते। एवमेव सूत्रेण अनेन आदैचां वृद्धिसंज्ञा क्रियते। तत्र आलोच्यते- यत्र अन्यत् क्रियापदं नास्ति तत्र अस्तिक्रियायाः भवतिक्रियायाश्च प्रयोगः कर्तव्यः

इति भाष्याशयेन आदैचः वृद्धिसंज्ञकाः स्युः इत्यर्थः प्रतिपादितः। वस्तुतस्तु सूत्रार्थस्य आशयः - आत् वृद्धिः, ऐ वृद्धिः, औ वृद्धिः इति। भवन्ति इति वर्तमानकालप्रतिपादिका विभक्तिः वर्तते। तेन वर्तमानकालः अवबुध्यते। सूत्रार्थप्रतिपादनसमये काशिकादिषु आधिक्येन भवतिक्रियायाः प्रयोगो दृश्यते, तद्यथा- अचि परतः इको यणादेशो भवति।[18] इति। अत्र भाषावृत्त्यर्थविवृतिकर्तुः मतं वर्तते यत् सूत्रार्थवर्णनसमये विधिलिङ्लकारस्य एव प्रयोगः उचितः इति। तत्र चायं हेतुः प्रदर्श्यते- अज्ञातज्ञापनं विधिः इति। एवमेव अज्ञातस्य अर्थस्य ज्ञापनमेव सूत्रेण क्रियते इत्यतः तत्र विधिलिङ्लकारः एव युक्तः, तेन पठति बभूव इत्यादिवत् प्रत्ययाः न भवेयुः इति आशयः।

उपसंहारः

अस्य शोधप्रबन्धस्य प्रारम्भे उपक्रमभागे पुरुषोत्तमदेवेन विलिखितायाः भाषावृत्तेः सामान्यपरिचयः, भाषावृत्तिः इति नामस्वारस्यम्, भाषावृत्त्यर्थविवृतेः प्राधान्यं चेत्यादयः सामान्यविषयाः उपपादिताः सन्ति। ततश्च भाषावृत्त्यर्थविवृतेः परिचयः इत्याख्ये भागे सृष्टिधराचार्यविरचितायाः भाषावृत्त्यर्थविवृतेः स्वरूपम्, अद्यत्वे भाषावृत्त्यर्थविवृतेः उपलब्धिः, सम्प्रति उपलभ्यमानः प्रकाशितग्रन्थः, भाषावृत्त्यर्थविवृतेः व्याख्याचतुष्टयं चेत्यादयः विषयाः आलोचिताः। ततश्च भाषावृत्त्यर्थविवृतिदिशा अदेङ्गुणः इति सूत्रं व्याख्यातम्। तत्रापि अदेङ्गुणः इत्यत्र अत् इति तपरकरणप्रसङ्गः, वृद्धिसंज्ञा गुणसंज्ञायाः बाधिका न वेति विषयः, मिलितानां गुणसंज्ञा उत प्रत्येकं चेत्यादयः मुख्याः अंशाः अत्र विचारिताः। तदनु भाषावृत्त्यर्थविवृतिदिशा वृद्धिरादैच् इति सूत्रं प्रतिपादितम्। तत्र मुख्यतः वृद्धिपदोत्तरसुबुत्पत्तिविमर्शः, आदैच् इत्यत्र एकं पदम् उत पदद्वयम् इति आलोचना, ऐच् इति प्रत्याहारस्थस्य चकारस्य कुत्वाभावविचारः, आदैच् इत्यत्र तपरकरणप्रसङ्गः, तपरपदस्य तात् अपि परः इति विग्रहास्वीकारे ग्रन्थकर्तुः विशिष्टमतचिन्तनम्, वृद्धिपदस्य मङ्गलार्थकत्वप्रतिपादनम्, सूत्रार्थवर्णनकाले विधिलिङ्लकारः प्रयोक्तव्यश्चेत्यादयः विषयाः उपन्यस्ताः वर्तन्ते। एवमेव अस्मिन् शोधप्रबन्धे भाषावृत्त्यर्थविवृतिदिशा गुणसंज्ञासूत्रविचारः वृद्धिसंज्ञासूत्रविचारश्च क्रमेण प्रस्तुतः। तेन सृष्टिधराचार्यैः भाषावृत्त्यर्थविवृतौ कीदृशी व्याख्यानशैली

समाश्रिता इत्यस्मिन् विषये वयं ज्ञातुं प्रभवामः। किञ्च विचारेण अनेन पुरुषोत्तमदेवेन प्रतिपादिताः सूत्रार्थाः सृष्टिधराचार्यैः भाषावृत्त्यर्थविवृतौ कथं विशदीकृताः सन्तीति इति विषयोऽपि सुष्ठुतया बुद्ध्यारूढो भवति। एवम् अस्मात् शोधप्रबन्धात् नूनमेव शाब्दिकानां महान् लाभो भविष्यति इत्याशास्य इहैव विरम्यते।

## सन्दर्भाः-

1. भाषावृत्ति का विवेचनात्मक एवं तुलनात्मक अध्ययन, पत्रम्- १३।
2. भाषावृत्तिः (सम्पादकः- स्वामी द्वारिकादासशास्त्री), सम्पादकीयम्, पत्रम्- ९।
3. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- १।
4. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), भूमिका, पत्रम्- ११।
5. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), भूमिका।
6. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- ९५।
7. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- ९६।
8. भाषावृत्तिः, भूमिका, पत्रम्- १।
9. भाषावृत्तिः, भूमिका, पत्रम्- ११।
10. भाषावृत्तिः, भूमिका, पत्रम्- १९।
11. https://vmlt.in/ncc/17?page=38
12. भाषावृत्ति का विवेचनात्मक एवं तुलनात्मक अध्ययन, पत्रम्- १३।
13. भाषावृत्तिः (सम्पादकः- स्वामी द्वारिकादासशास्त्री) पत्रम्- ३।
14. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- १९।
15. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- १७।
16. भाषावृत्तिः (भाषावृत्त्यर्थविवृतिसहिता), पत्रम्- १७।
17. भाषावृत्तिः, पत्रम्- २।
18. https://ashtadhyayi.com/sutraani/1/1/1

## आश्रितग्रन्थसूची

1. पुरुषोत्तमदेवः। (१९१२)। भाषावृत्तिः (सृष्टिधराचार्य-कृत-भाषावृत्त्यर्थविवृतिसहिता) । चन्द्रः, गिरीशः (वेदान्ततीर्थः) (सम्पादकः)। कलिकाता : एशियाटिक्-सोसाइटि-अफ्-वेङ्गल।

2. पुरुषोत्तमदेवः। (१९१८)। भाषावृत्तिः। चक्रवर्ती, श्रीशचन्द्रः (संस्कर्ता, सम्पादकः) । राजशाही (बांला-देशः) : वरेन्द्र-रिसर्च-सोसाइटि।
3. मीमांसकः, युधिष्ठिरः। (२०२०)। संस्कृत व्याकरण शास्त्र का इतिहास । त्रिपाठी, रामनाथः (सम्पादकः)। वाराणसी : चौखम्भा-पब्लिशर्स।
4. शर्मा, लेखराजः। (१९९७)। भाषावृत्ति का विवेचनात्मक एवं तुलनात्मक अध्ययन । हिमाचलप्रदेशः : ज्ञानाशीष-प्रकाशनम्।
5. पुरुषोत्तमदेवः। (१९७१)। भाषावृत्तिः । द्वारिकादासशास्त्री, स्वामी (सम्पादकः)। वाराणसी : तारा पब्लिकेशन्स।
6. Das, Swyambha. (2017). A Fundamental Discussion About the Commentaries on Bhāṣāvṛtti. International Journal of Research and Analytical Reviews, Volume 4, Issue 4, Oct-Dec.
7. Bhattacharyya, Dineshchandra. (1922). Paninian Studies in Bengal. Sir Asutosh Mookerjee Silver Jubilee Volumes, Vol. III, Part-1, Calcutta : Calcutta University Press.
8. Soltwedel, Małgorzata Wielińska. (2006). The Bhāṣāvṛttivivaraṇa-pancikā of Viśvarūpa, The First adhyāya and a detailed examination [Doctoral dissertation, University of Hamburg]. https://ediss.sub.uni-hamburg.de/handle/ediss/1328
9. https://vmlt.in/ncc/17?page=38
10. https://ashtadhyayi.com/sutraani/1/1/1

❋ ❋ ❋